**समूहनी** स्त्री समुह्यतेऽनया सम्+ऊह–करणे ल्युट् ङीप्। १सम्मार्जन्यां हेमच०। भावे ल्युट्। २सम्मार्जने परिसमूहनशब्दे ४२५८ पृ० दृश्यम्। ३सम्यगूहकरणे च न०।

**समूहालम्बन** त्रि० समूहमालम्बते विषयतया आ+लबि–ल्यु। नानाप्रकारतानिरूपितनानाविशेष्यताशालिनि ज्ञाने। तत्र संशये नानाप्रकारतानिरूपिताया एकविशेष्यतायाः सत्त्वात् न समूहालम्बनत्वम्। धवखदिरौ द्वावित्यादौ दण्डी कुण्डी च देवदत्त इत्यादौ वाक्यजनितबोधस्यापि समूहालम्बनत्वं तत्रोभयनिरूपितयोः विशेष्यतयोर्द्वयोरेवाङ्गीकारात् द्वन्द्वात्परस्य यमाणशब्दस्य प्रत्येकान्वयनियमेन प्रथमार्थद्वित्वस्य प्रत्येकवृत्तित्वात् तस्य समवायेनैवेति बोध्यम्। अतएव शब्दचिन्तामणौ कथिकता धवखदिरपलाशांश्छिनत्तीत्यादौ प्रत्येककर्मताया एव विभिन्नक्रियायामन्वय इत्युक्तम्। अत उक्तस्थले विशेष्यताद्वयम्। धवखदिरौ द्वावित्यादावपि द्वित्वस्य समवायसम्बन्धेन धवादिवृत्तित्वात् विशेष्यताद्वयाङ्गीकारेऽपि नक्षत्यभावात्। तेनैव धवखदिरौ न द्वाविति प्रतीतिवारणासम्भवात्। घटं पटञ्च पश्यतीत्यादौ च दर्शनक्रियायां घटपटयोरन्वयसम्भवे तु न समूहालम्बनमिति भेदः इत्यादिबोध्यम्। यदि च आत्मघटयोर्नात्मत्वमित्यादि प्रयोगसाधुत्वार्थं पर्याप्तिसम्बन्धेनैव द्वित्वादेर्बोधोऽङ्गीक्रियते तदा तस्य न समूहालम्बनत्वम्।

**समूहिन्** त्रि० समूहोऽस्त्यस्य इनि सम्+ऊह–णिनि वा। समूहावयवे प्रत्येकवस्तुनि यथा घटपटसमूहान्तर्गता घटः पटश्च समूही। २सम्यक्तर्कयुते त्रि० स्त्रियां ङीप्

**समूह्य** पु० सम्+ऊह–ण्यत्। १यज्ञियाग्नौ अमरः २सम्यक् तर्क्ये त्रि० ३यज्ञाग्निसंस्कारभेदे सि०कौ०।

**समृद्ध** त्रि० सम्यक् ऋद्धः ऋध–क्त। १अधिकसम्पत्तियुक्ते अमरः। २अतिवृद्धे च शब्दमा०।

**समृद्धि** स्त्री सम्यक् ऋद्धिः सम्+ऋध–क्तिन् वा। १अतिसम्पत्तौ अमरः २सम्यग्वृद्धौ च "मधुसमृद्धिसमेधित या मेधया" माघः।

**समेत** त्रि० सम्+आ–इण क्त। १समागते २सङ्गते च।

**समेधित** त्रि० सम्+एध+णिच्–क्त। संवर्द्धिते "मधुसमृद्धि समेधितमेधययेति" माघः।

**समोदक** न० समम् अर्द्धभागेन तुल्यमुदकं यत्र। अर्द्धाम्बु संयोगेन मथितदधिजाते १तक्रभेदे हेमच०। सह मोदकेन सहस्य सः। २मोदकसहिते त्रिकाण्डशेषः।

**सम्पत्ति** स्त्री सम्+पद–क्तिन्। १अतिविभवे अमरः २अनुरूपात्मभावे यस्य यद्रूपता उचिता तस्य तथाभवने च सि०कौ० ३विभूतौ मेदि०।

**सम्पद्** स्त्री सम्+पद–सम्प० भावे क्विप्। १विभवे २सम्पत्तौ च अमरः। ३गुणोत्कर्षे। करणे क्विप्। ४हारभेदे पु० मेदि०। घञर्थे क। सम्पद तत्रार्थे न० शब्दमा०।

**सम्पन्न** त्रि० सम्+पद–क्त। १साधिते २सम्पद्युक्ते च मेदि०

**सम्पराय** पु० सम्+परा+इण–आधारे अच्। १युद्धे २आपदि ३उत्तरकाले च अमरः।

**सम्परायिक** न० सम्परायाय आपदे हितम् ठन्। १युद्धे तदर्थे ठण्। २साम्परायिकमप्यत्र अमरः। [मेदि०।

**सम्पर्क** पु० सम्+पृच–घञ्। १सम्बन्धे २रतौ ३मेलके च

**सम्पर्किन्** त्रि० सम्+पृच–घिनुण्। सम्बन्धयुक्ते।

**सम्पा** स्त्री सम्यक् अतर्कितं पतति पत–ड। विद्युति अमरः।

**सम्पाक** पु० सम्यक् पाको यस्मात् ५ब०। आरग्वधवृक्षे अमरः तद्भोजने हि भुक्ताद्यादेः सम्यक्पाको भवतीति वैद्यके प्रसिद्धम्। २धृष्टे ३तर्कके मेदि० ४लम्पटे ५अल्पे च त्रि० धरणिः।

**सम्पात** पु० सम्+पत–घञ्। १पक्षिगतिभेदे जटा० २सम्यक्पतने च। ३रेखासूत्रादेः सम्पतने च।

**सम्पाति** पु० सम्+पत–णिच्–इन्। जटायुषो ज्येष्ठभ्रातरि पक्षिभेदे रामा०। स्वार्थे क। तत्रैव। सम्पातिरिव कायति कै–क। सम्पातिक गरुडज्येष्ठतनये शब्दमा०।

**सम्पुट** पु० सम्+पुट–क। १कुरुवकवृक्षे अमरः। सम्यक् पुटमिव उभयपार्श्ववर्त्ति यस्य। २एकजातीयपदार्थेन भिन्नजातीयस्य उभयतो व्याप्ते त्रि० "सकारैः सम्पुटोजाप्यः" इति तन्त्रम्।

**सम्पुटक** पु० सम्पुटयति सम्+पुट–अच् स्वार्थे वुन्। समुद्गके मञ्जूषाख्ये (पेटारा) पदार्थविशेषे अमरः।

**सम्पूर्ण** त्रि० सम्+पूर–क्त। १परिपूर्णे २समग्रे च "आदित्योदयवेलायाः प्राङ्मुहूर्त्तद्वयान्विता। एकादशी हि सम्पूर्णे"ति स्मृत्युक्ते ३एकादशीभेदे स्त्री ति०त०। युद्धे ४षष्टिदण्डात्मकतिथिमात्रे स्त्री तिथिशब्दे ३२९३ पृ० दृश्यम्।

**सम्पृक्त** त्रि० सम्+पृच–क्त। १मिश्रिते हेमच० २सम्बद्धे च

**सम्प्रणयन** न० सम्+प्र+णी–ल्युट्। १सम्यगवक्रवृत्तादेः शोधनाय संस्कारविशेषे २विधाने च। [अमरः।

**सम्प्रति** अव्य० सम्+प्रति+समाहारद्वन्द्वः। इदानीमित्यर्थे

**सम्प्रतिपत्ति** स्त्री सम्+प्रतिपद्यते क्तिन्। १वाद्युक्तार्थवि-